योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०६६

षट्षष्टितमः सर्गः ६६

श्रीवसिष्ठ उवाच ।
अथेत्युक्तवती पृष्टा सा मया कल्पितासना ।
संकल्पितासनस्थेन स्थितेन नभसि स्थिता ।। १
कथं शिलोदरे बाले त्वद्विधानां भवेत्स्थितिः ।
कथं संचलनं तत्र किमर्थं तत्र चास्पदम् ।। २
विद्याधर्युवाच ।
मुने यथेदं भवतां जगत्स्फारं विराजते ।
तथास्माकं जगत्तत्र सर्गसंसारयुक् स्थितम् ।। ३
स्फुरन्ति नागाः पाताले तिष्ठन्ति भुवि पर्वताः ।
आपश्छलछलायन्ते वहन्ति व्योम्नि वायवः ।। ४
अर्णवा अर्णसा भान्ति यान्त्यन्तः शनकैः प्रजाः ।
भूतान्यजस्रं जायन्ते म्रियन्तेऽविरतं यथा ।। ५
वान्ति वाता वहन्त्यापो भान्ति चाभान्ति खे सुराः ।
तिष्ठन्त्यगाः समुद्यन्ति ग्रहा यान्ति महीं नृपाः ।। ६
देवासुरमनुष्याणां व्यवहारपरम्पराः ।
लोलाः प्रवृत्ता आकल्पमासमुद्रमिवापगाः ओ। ७
दिनपद्मानि भूलोकसरस्याकल्पमानभः ।
लोलाभ्रालीनि फुल्लानि मीलितोन्मीलितान्यलम्।।८
चन्द्रचर्चाश्चतुर्दिक्कं चन्दनेनात्मतेजसा ।
रचयन्रात्रिरोहिण्योस्तमो हन्त्यपि हृद्गतम् ।। ९
स्वदशास्वादनरता वातयन्त्रसुचारिता ।
रोदःसद्मनि सूर्याख्या दीप्यते दिवि दीपिका ।। 6.2.66.१०
ब्रह्मसंकल्पितो रुद्धो वातसंचारचारिभिः ।
खेऽनिशं चक्रमृक्षाणां गुणावर्तो विवर्तते ।० ११

भूततण्डुलमासृष्टेः पिनष्टि ध्रुवकीलकः ।
नियत्या चलितो रोदः कपाटाम्भोदघर्घरः ।। १२
द्वीपाब्धिशैलैर्भूपीठं विमाननगरैर्नभः ।
देत्यदानवनागौघैः पूर्णं पातालमण्डलम् ।। १३
कुण्डलं त्रिजगल्लक्ष्म्या नीलं भूतलमण्डलम् ।
स्थितं चञ्चलमाचारचञ्चलायाः स्फुरन्मणि ।। १४
बुद्ध्यादिरहितां स्पन्दसंविदं वायवीमिव ।
स्थावरं जंगमं चैव सूक्ष्ममादाय जायते ।। १५
मुनिमौनैर्धरा वार्भिर्मारुतैः कपिचापलम् ।
आकाशैरवकाशित्वं तेजोभिर्भासनं श्रितम् ।। १६
वृक्षोर्व्यब्ध्यद्रिखचराः प्राणिनोन्तः स्फुरन्त्यलम् ।
मृतिजन्मोन्मुखाः कीटसुरासुरजलौकसः ।। १७
ससुरासुरगन्धर्वाः कालः कलयति प्रजाः ।
दोर्भिः कल्पयुगाब्दैश्च स्वपशूनिव पालकः ।। १८
अनन्तविपुलागाधगम्भीरे कालसागरे ।
उत्पत्त्योत्पत्त्य लीयन्ते ते त्वावर्तविवर्तया ।। १९
चतुर्दशविधा वातवेल्लिता भूतपांसवः ।
नाशाकाशे विलीयन्ते शरदम्भोदलीलया ।। 6.2.66.२०
भुवनं बोधयन्ती द्यौश्चन्द्रार्ककरचामरैः ।
स्थिताकाशांशुकाकल्पतारकोत्करशेखरा ।। २१
स्थिताः पवनभूकम्पमेघतापसहिष्णवः ।
स्वं प्रदेशमनुज्झन्त्यः ककुभः स्तम्भिता इव ।। २२
उत्पातमेघनिर्ह्रादभूमिकम्पग्रहग्रहैः ०
अप्यातैरपि विज्ञातैर्भूतानां जायते गतिः ।। २३
सप्तानां जलमब्धीनामौर्वाग्निः पिबति ज्वलन् ।
लोकान्तराणामाकल्पं कालो भूतगणं यथा ।। २४
पातालमाविशति याति नभोबिलं च
दिङ्मण्डलं भ्रमति भूतगणः समन्तात् ।
पर्येति पर्वतमहार्णवमण्डलानि
द्वीपान्तराणि च मरुत्सरणक्रमेण ।। २५

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मोक्षो० निर्वाणप्रकरणे उत्तरार्धे पाषाण० शिलान्तरवर्णनं नाम षट्षष्टितमः सर्गः ।।६६।।